श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्भागवते दशमस्कन्धे

# ॥ श्री ज्वरस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री ज्वरस्तुतिः ॥

ज्वर उवाच

नमामि त्वानन्तशक्तिं परेशं
सर्वात्मानं केवलं ज्ञप्तिमात्रम्।
विश्वोत्पत्तिस्थानसंरोधहेतुं
यत्तद् ब्रह्म ब्रह्मलिङ्गं प्रशान्तम्॥ 1 ॥

कालो दैवं कर्म जीवः स्वभावो
द्रव्यं क्षेत्रं प्राण आत्मा विकारः।
तत्सङ्घातो बीजरोहप्रवाहः
त्वन्मायैषा तन्निषेधं प्रपद्ये॥ 2 ॥

नानाभावैर्लीलयैवोपपन्नैः
देवान् साधून् लोकसेतून् बिभर्षि।
हंस्युन्मार्गान् हिंसया वर्तमानान्
जन्मैतत्ते भारहाराय भूमेः॥ 3 ॥

तप्तोऽहं ते तेजसा दुःसहेन
शान्तोग्रेणात्युल्बणेन ज्वरेण।
तावत्तापो देहिनां तेऽङ्घ्रिमूलं
नो सेवेरन् यावदाशानुबद्धाः॥ 4 ॥

श्रीभगवानुवाच

त्रिशिरस्ते प्रसन्नोऽस्मि
व्येतु ते मज्ज्वराद् भयम्।

योनौ स्मरति संवादं
तस्य त्वन्न भवेद् भयम्॥ 5॥

॥ इति श्री ज्वरस्तुतिः समाप्ता॥